हिताया्ग्रे बलिं हरेत्" स्मृ०। "यदि धन्वन्तरि चैत्यो भवति तदा ब्रह्मणमग्निं चान्तरा पुरोहिताग्रे बलिं हरेत् पुरोहिताय नम इति ततो धन्वन्तरये नम इति। धन्वन्तरौ विदेशस्थे त्वयं विशेषः धन्वन्तरेश्च पुरोहितस्य चैकः पिण्डः द्वितीयो दूतस्य"। ना० ह०।

**चैत्यविहार** पु० चैत्यस्येव विहारोऽत्र। जिनगृहे हेम०।

**चैत्र** न० चि–ष्ट्रन् चित्रमेव स्वार्थे अण् वा। १देवकुले (देउल) २स्मृते मेदि० ३बुद्धभिक्षुके पु० ४वर्षाचलभेदे पु० त्रिका० कुलपर्वतशब्दे २१२३पृ० दर्शिते विष्णुपु०वाक्ये "गोमेदश्चैव चन्द्रश्चेत्यत्र चैत्र इति पाठान्तरदर्शनात् त्रिकाण्डोक्तिः समञ्जसा। चित्रायां भवः अण्। बुधस्य कलत्रभेदचित्रायागर्भजे ५बुधपुत्रभेदे पु० ब्रह्मवै० पा० ख०। चित्रानक्षत्रयुक्ता पौर्णमासी अण् ङीप् चैत्री सास्मिन् मासे पुनरण्। चित्रानक्षत्रयुक्तपौर्णमासी युक्ते तदुपलक्षिते वा ६चान्द्रे मासि वार्हस्पत्ये ७वर्षभेदे ८तथाभूते अर्द्धमासे मीनस्थरविके ९सौरचैत्रे च कार्त्तिकशब्दे १९४८पृ० दृश्यम्। चित्रायां भवः अण्। १०चित्रानक्षत्रजाते त्रि० स्त्रियान्तु तस्याणो लुक्। चित्रा चित्राजातायां स्त्रियां स्त्री चित्राशब्दे दृश्यम्। स्वार्थे क तत्रार्थे शब्दरत्ना०। "फाल्गुनं वाथ चैत्रं वा मासं प्रति यथावलम्" मनुः। "मीनादिस्थो रविर्येषामारम्भः प्रथमक्षणे। भवेत् तेऽब्दे चान्द्रमासास्चैत्राद्या द्वादशः स्मृताः" व्यासः "चैत्रे मदोन्मादिनी" उद्भा०त०।

**चैत्ररथ** न० चित्ररथेन गन्धर्व्वेण निर्वृत्तम् अण्। १कुबेरस्योद्याने अमरः। "बभौ वल्गुजनाकीर्णं वनं चैत्ररथं यथा" हरिवं० २२४अ०। "एकोययौ चैत्ररथप्रदेशान्" रघुः २मुनिभेदे पु० "आविक्षितमभिप्यन्तं तथा चैत्ररथं मुनिम्" भा० आ० ६३अ०। चैत्ररथेः शशविन्दोरपत्यम् स्त्री अण् ङीप्। ११शशविन्दोःसुतायां स्त्री "मान्धातुर्युवनाश्वस्य त्रिलोकीविजयी सुतः। तस्य चैत्ररथी भार्य्या शशविन्दोःसुताऽभवत्" हरिवं०१२अ०। चित्ररथं गन्धर्वमधिकृत्य कृतोग्रन्थः अण्। १२भारतपर्व्वान्तर्गतेऽवान्तरपर्वभेदे न० चित्ररथशब्दे दृश्यम्। "तथा चैत्ररथं देव्याः पाञ्चाल्याश्च स्वयंवरम्" भा० आ० १०अ० अवान्तरपर्वोक्तौ।

**चैत्ररथि** पु० चित्ररथस्य उपङ्गुपुत्रस्यापत्यम् अण्। उपङ्गुपुत्र चित्ररथस्यापत्ये शशविन्दौ नृपे "ततः प्रसूतिमिच्छन् वै उपङ्गुःसोऽग्रमात्मजम्। जज्ञे चित्ररथस्तस्य पुत्रः कर्म्मभिरन्वितः। आसीत् चैत्ररथिर्वीरो यज्वा विपुल दक्षिणः। शशविन्दुः परं क्षत्रं राजर्षीणां समन्वितः" हरिवं० ३७अ०।

**चैत्ररथ्य** न० चैत्ररथमेव स्वार्थे ष्यञ्। चैत्ररथवने "मानसे चैत्ररथ्ये च स रेमे रामया रतः" भाग०२।१२।२८अ०।

**चैत्रमख** पु० चैत्रे कर्त्तव्यो मख इव महोत्सवः। चैत्रमासे मदनत्रयोदश्यादिकर्त्तव्ये वसन्तोत्सवे हेमच०।

**चैत्रायण** पुंस्त्री चित्रस्य गोत्रापत्यम् नडा०फक्। १चित्रस्य गोत्रापत्ये। चित्रेण निर्वृत्तादि पक्षा० फक्। २चित्रनिर्वृत्तादौ त्रि०।

**चैत्रावली** स्त्री चैत्रे आवलिः सम्यक् बलिरत्र ङीप्। चैत्रपौर्णमास्यां त्रिका०। "चैत्रावल्याः परे ऽपि या" ति० त०। "चैत्रावली मदनत्रयोदशीत्यपरे तस्यामेव मदनपूजाविधानात्तस्यास्तथात्वम्।

**चैत्रिक** पु० चित्रानक्षत्रयुक्ता पौर्णमासी साऽस्मिन् मासे पक्षे ठक्। चैत्रमासे अमरः।

**चैत्रिन्** पु० चैत्री विद्यतेऽस्मिन् व्रीह्या० इनि। चैत्रमासे राजनि०। तत्र चैत्रिरित्यपि तत्र वा० इञ्।

**चैत्री** स्त्री चित्रानक्षत्रयुक्ता पौर्णमासी अण् ङीप्। चित्रानक्षत्रयुक्तायां पौर्णमास्यां सा हि चैत्रमासे एव भवति योग्यत्वात् कार्त्तिकशब्दे १९४८ पृ० दृश्यम् "चैत्र्यां हि पौर्णमास्यां तु तव दीक्षा भविष्यति" भा० आश्व० ७२अ०। "चैत्र्यां वा मार्गशीर्ष्यां वा सेनायोगः प्रशस्यते" भा० शा० १००अ०।

**चैदिक** पुं त्रि० चेदिदेशे भवः काश्या० ठञ् ञिठ् वा इदित्। चेदिदेशभवे स्त्रियां तु ठञि ङीप् ञिठि–टाप्।

**चैद्य** पु० चेदीनां जनपदानां राजा ष्यञ्। १शिशुपाले। "कुरुष्व चैद्यं प्रति" "त्वया विप्रकृतश्चैद्यः" माघः।

**चैन्तित** पुंस्त्री० चिन्तितायाः तन्नामिकायाः स्त्रिया अपत्यम् "अव्यङ्गाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः" पा० अण्। चिन्तितानामिकायाः स्त्रिया अपत्ये। चिन्तायुक्तायाः स्त्रिया अपत्ये तु ढक्। चैन्तितेय इत्येव।

**चैल** त्रि० चेलस्येदम् अण् १वस्त्रसम्बन्धिनि स्वार्थे अण्। २चेले वस्त्रे च(चै)लाशकशब्दे दृश्यम्। "चैलकम्बलवेश्मानि विचित्राणि महान्ति च" भा० आ० १२८अ०। "प्रदीप्तमिव चैलान्तं कस्तं देशं न सन्त्यजेत्" भा० श० २८९अ०।

**चैलकि** पु० चेलकस्यापत्यम् इञ्। जीवलनामर्षौ "तद्ध-